# Shri Raghavendra Pradakshinagadyam

# श्रीराघवेन्द्रप्रदक्षिणागद्यम्

## Document Information

Text title : Shri Raghavendra Pradakshinagadyam

File name : rAghavendrapradakShiNAgadyam.itx

Category : deities_misc, gurudev, gadyam

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# श्रीराघवेन्द्रप्रदक्षिणागद्यम्

जय जय गुरुराज, जय जय जगतः क्षेमाय, श्रीराघवेन्द्र
गुरुसार्वभौम भो, शरणागतभूभृन्निकुरम्बम्, नान्यावलम्बं
विगतविलम्बं रक्षितुकामं, सुगुणारामं दोषविरामं, ग्रहणे
भीमं, बुधजन सन्देहहरं, वन्दे मयि कुरु मन्दे, सन्ततकरुणां,
शोकहरणां पार्वणहरिणाङ्काननरमणीयाकृति हरिणीलोचन तरुणी
लीलासरणीलोलुपचित्ते यौवनमत्ते, विनिहतवित्ते, विगतमहत्ते,
वनमदमत्तेभकुम्भवृत्ते स्तने प्रदत्तेहे, हा हतशीले, कपटशीले,
श्रीलगृहान् वा गाम गामं दीनारान् वा यायं याचं, हीननरान् वा सेवं
सेवं, परदारान् वा दर्शं दर्शं सञ्चितपापे, कुञ्चितपुण्ये,
वञ्चितसाधौ, पञ्चमरागे, पञ्चितकर्णे, पञ्चशरास्त्रैः
अञ्चितबाधे, सुलभक्रोधे, विगतविबोधे, विवेकहीने, काङ्क्षितयाने,
मतापमाने, भवमधिरूढे, भावितुमूढे, कैतवगूढे, मयि
गुणलेशोऽपि न हि, रमेशोपासनयेशो शकलं कर्तुं चान्यत् कर्तुं
तत्तेङ्घ्र्यम्भोजं प्रापं भो, जय जय गुरुराज गुरुराज ॥ १ ॥

यतिवर मायोपहतो भूयो दारापत्यादिकसंसृत्यामनुभूयैवं
दुःखमभूवं, पुत्रोऽहं ते हिमकरशान्ते, कमलाकान्तेडित
चरणान्ते, कृतविश्रान्ते, नितरां मां ते पदरुद्धाङ्क्षे,
स्वर्थाकाङ्क्षे स्मरदाकाङ्क्षे, ??कनकमयघटी
कनत्कुचतटी लसत्तनुपटीरलक्षितकटीरलघुश्रोणी
भ्रमरश्रेणी सन्निभवेणीर्मञ्जुल- वाणी नयनजितैणीः,
कुचभरतान्ताः, कपटस्वान्ताः, कलिभिरशान्ताः, विलोक्य
कान्ताः चञ्चलमनसा, भ्रान्तस्तरसा, मोहावर्ते, सुचिरं
प्रीत्यै तासामुत्तमवासांस्यनर्घ्य-भूषादिकानिनीषामालम्ब्याहं,
कुञ्चितदेहं धनिनां गेहं त्वरितङ्गत्वा दीनो भूत्वा, स्तवनं
कृत्वा, परीचरित्वा कोशं नापं, क्लेशमवापं, विपुलालापं,

कृत जपलोपं, धृतावलेपं, साधितकपटं, मुखवीतपटं,
धृतजपमालं, भुविजनजालं, सुवञ्चयानो, विहङ्गयानोपासहीनो,
व्यचरं नित्यं, नरकं सत्यं भवतीत्यालोच्य, सम्प्रति लोपागत,
शरणागत जनभरणादरवन्तं त्वां पितरं मत्वाऽधुनागतो भो जय
जय गुरुराज गुरुराज ॥ २॥

कृष्णावधूतं मां कुरु पूतं, तव पदपोतं त्वमेव शरणं
नान्यत्करणं, भवभयहरणं, त्वदभयहस्तं दत्तसमस्तं,
निधेहि मस्ते, जगति समस्ते, सदृशः कस्ते, समस्ततन्त्र-
स्वतन्त्र मन्त्रालयकृतधामन्, शुभगुणभूमन्, उदारधीमंस्तव
महिमानं, निरस्तमानं, प्रकाशमानं, निशम्यनिकटं, भक्तिप्रकटं,
प्राप्तजनानां भजमानानां, त्वरितं नानाभीप्सितदानालम्बितवलयं,
कृतपापलयं, त्वामाऽऽलोक्यादरात्त्रिलोक्यामनुपमचरितं,
मम बहुदुरितं, दूरूकुर्यादिति मत्वार्यागतमुद्धर
मामितरासुगमामुद्धृतिविद्यां यास्यनवद्यां, प्रतिहतनिद्रैः
सौधसमुद्रैस्तुङ्गतरङ्गैः प्रेमकुरङ्गैः सम्भृतसङ्गैः
ललितापाङ्गैः, पश्यन् सदयं, मोदित हृदयं, कुरु तव शक्तिं
वक्तुमशक्तिं भजमानोऽहं नाशक मेघस्फीतमनीषो हेयविशेषो,
विषादपूरे, निर्गतसारेऽस्थिरसंसारे, सुखावभासं, दुःखविकासं,
बहुमन्वानः, किं तन्वानः, सुखी भवेयं तव पदि सेयं प्रणामरीतिः
पालय मां भोः जय जय गुरुराज गुरुराज ॥ ३॥

इति श्रीमत्कृष्णावधूतपण्डितकृतौ श्रीराघवेन्द्रतन्त्रे दशमपटले
प्रदक्षिणागद्यं सम्पूर्णम् ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Pradakshinagadyam*

pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*